# ।। श्रीमन्नारदमहापुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

## प्रथमाध्यायः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।।

पुराणेऽस्मिन् भागद्वयं, तत्र पूर्वभागः पञ्चविंशदुत्तरशताध्यायेभ्यः, अपरभागस्तु द्व्यशीत्यध्यायेभ्यश्च निबद्धौ ।

गन्थपीठिका - नैमिषे तत्त्वजिज्ञासवः सभां संयोजयन् । तस्यां सभायां षड्विंशतिसहस्रसङ्ख्याकाः जितेन्द्रियाः जिताहाराः सत्यपरायणाश्च ज्ञानिनः समवेता आसन्, अपृच्छंश्च सूतं व्यासशिष्यम् ।

दिवौकसो हि जीवन्ति पीत्वा चन्द्रकलामृतम् ।

ज्ञानामृतं भूसुरास्तु मुने त्वन्मुखनिःसृतम् ।।

भूलोके कानि पुण्यतीर्थानि ?- पुण्यक्षेत्राणि कानि ? को वा मुक्तिमार्गः ? हरेः पूजाक्रमं ब्रूत इति । सूतः प्रत्यब्रवीत् । भवद्भिर्यत्पृष्टं तस्य समाधानं श्रीनारदमहापुराणेऽस्ति । तत् पुराणं च सनको नारादायोपदिदेश

द्वितीयोऽध्यायः

एकदा ब्रह्ममानसपुत्रा विष्णुपद्यां स्नातुकामार्भूलोकमगमन् । स्वाग्रजान् सूर्यसदृशान् तान् दृष्ट्वा नारदोऽनमत् । तथा तत्त्वजिज्ञासुः सोऽपृच्छत् । स्थावरजङ्गमात्मकं प्रपञ्चं कोऽसृजत् ? गङ्गा कस्य पदोदकम् ? भगवद् ज्ञानं केनोपायेन लभ्यते । त्रिविधकर्माणि कथं सार्थकानि भवन्ति ? किं ज्ञानलक्षणम् ? तपो नाम किम् ? विष्णोः प्रियकरातिथिः का ? पूजायाः विधिं ब्रूत' इति ।

सनत्कुमारस्तु मङ्गलाचरणरूपां विष्णोः स्तुतिम अकरोत् । 'परेभ्यो ब्रह्मादिभ्यः परः श्रीहरिः' । यो हरिः केशिहन्ता, प्रह्लादवरदः, नीचोच्चेषु सकलपदार्थेषु व्याप्यः, प्राकृतगुणविहीनः, अप्राकृतगुणपूर्णः, ध्यानैकगम्यः, आदित्यचन्द्रादिसकलदेवसमूहस्यादिशक्तिः, ब्रह्मणि स्थित्वा सृष्टिं, शिवे स्थित्वा लयं च करकः (करोति) । केवलनामस्मरणादेव गजेन्द्रादीनां दुरितं दूरीकृत्य तान्नुज्जहार । कृष्णाद्यवतारेषु केश्यादिनानादुष्टान् दमयन् विरराज । वराहाद्यवतारेषु भूद्धरणाद्यनन्यसाध्यकर्माणि कुर्वन् जगद्रक्षणमकरोत् । प्रपञ्चस्यान्तर्बहिर्व्याप्य तिष्ठति, जगतोऽत्यन्तभिन्नः, एतादृशो हरिः ससर्ज जगत् ।

अशीतितमोऽध्यायः

नारदः स्त्रीत्वमवाप — पञ्चयोजनप्रदेशेषु व्याप्तं बृन्दावनम् । वनेऽस्मिन् गोवर्धननामको गिरिरस्ति । तस्मिन् पर्वते गोवर्धननामको विप्रस्तपश्चचार । प्रसन्नो हरिरपरोक्षो बभूव । तं हरिमयाचत

‘मत्पृष्ठोपरि पदं विधत्स्व’ इति । हरिस्तु पदमधात् । विप्रोऽब्रवीत् ‘अत्रैव तव पदं स्थिरीकुरु’ इति । अतः स विप्र एव गिरिरभूत् ।

एकदा नारदो वृन्दावनमगमत् । तद्वनमहिमां वक्तुं राधायां व्यजिज्ञपत् । तदा देवी तं मुनिमाज्ञापयत् ‘सरस्यस्मिन् ममज्ज’ इति । तत्क्षणादेव मुनिः नारदः स्त्री बभूव । शताधिकाः स्त्रियः हरिमत्र सेवन्ते स्म । लज्जया दूरस्थितं स्त्रीरूपिणं नारदं हरिराहूयादात् विशिष्टसौख्यम् । ततो नारदो निजरूपमवाप ।

एकाशीतितमोऽध्यायः ।

श्रीकृष्णचरितम्- एवं मोहिन्या सहितो नानाक्षेत्राणि संदृष्ट्वा नारदोऽन्ततः स बृन्दावने स्थातुमिच्छन् ब्रह्मणि प्रार्थयत् ‘अनुज्ञां देह्यहमत्रैव निवसामि’ इति । अत्र स्थित्वा नारदेन सङ्गृहीता कृष्णबाललीला ।

द्व्यशीतितमोऽध्यायः

पुराणसमाप्तिः — ब्रह्मपुत्री मोहिनी विप्रस्य वसोरुपदेशानुसारेण गङ्गादि सर्वतीर्थानि सन्ददर्श । अद्भुतमिदं पुराणं व्यासः पैलादिमहर्षिभ्यः सूताय चोपदिदेश । सनकस्तु नारदायोपदिदेश । नारदेन जगति प्रसिद्धमिदं पुराणं ‘महानारदपुराणम्’ इत्येव व्यवहारविषयमभूत् । श्रोतॄणां सकलाभीष्टदायकमिदं महापुराणम् ।

समाप्तमिदं श्रीमन्नारदमहापुराणम्